H.S.S. 9. 197.

॥ श्रीः ॥

हरिदास-संस्कृत-ग्रन्थमाला

१९७

PK402
.H3
V.197

UNIVERSITY OF CHICAGO
LIBRARY
Classics
SERIAL RECORD

॥ श्रीः ॥

वसन्तोत्सवनिर्णयः

न्यायव्याकरणाचार्य—

पण्डित श्रीसूर्यनारायणशुक्लेन

सङ्कलितः ।

The Haridas Sanskrit Series
Benares City

प्रकाशकः

जयकृष्णदास-हरिदास गुप्तः,

चौखम्बा संस्कृत सीरिज आफिस

विद्याविलास प्रेस, बनारस सिटी ।

सं० २००६] मूल्य =) [सन् १९५०

[पुनर्मुद्रणादिकाः सर्वेऽधिकाराः प्रकाशकाधीनाः]

Rs. -12-

श्रीविश्वेश्वरः शरणम् ।

वसन्तोत्सवनिर्णयः ।

चैत्रकृष्णप्रतिपदि वसन्तोत्सवः सा चौदयिकी ग्राह्या 'प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवौ । कृत्वा चावश्यकार्याणि संतर्प्य पितृदेवताः ॥ वन्दयेद्धोलिकाभूतिं सर्वदुःखोपशान्तये ।' इति भविष्योक्तेः, दिनद्वये तथात्वे पूर्वा-वत्सरादौ वसन्तादौ बलिराज्ये तथैव च । पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैः ॥ इति वृद्धवसिष्ठवचनात् । इति निर्णयसिन्धुकारमतम् ।

एतदेव मतम् 'अत्र पूर्वाह्णस्य कर्मकालत्वात्-कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः इति वचनात् प्रतिपत्सद्वितीया स्यात् इति वचनाच्चौदयिकी ग्राह्या, दिनद्वये तथात्वे पूर्वैव-वत्सरादाविति वचनात्' इति ग्रन्थेन पुरुषार्थचिन्तामणौ विष्णुभट्टेन समर्थितम् , अनुमोदितं च धर्मसिन्धुकृता 'फाल्गुनकृष्णप्रतिपदि वसन्तोत्सवः सा चौदयिकी ग्राह्या दिनद्वये तथात्वे पूर्वा' इतिवाक्यसन्दर्भेण ।

निर्णयामृतकारास्तु-'तत्र चैत्रकृष्णप्रतिपदि पूर्वविद्धायां नीराजनादिकर्म कर्तव्यम् अस्य च होलिकानन्तरकर्तव्यत्वात् होलिकायाश्च पूर्वविद्धाया एव प्रशस्तत्वात् एतदपि पूर्वविद्धायामेवेत्यवसीयते' इत्याहुः ।

इदं च मतम् 'इदं च सर्वं होलिकानन्तरकर्तव्यत्वात् पूर्वविद्धायां प्रतिपद्येव कार्यम् इति निर्णयामृते । अतश्च-प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवावित्यपपाठः निर्णयामृतधृतपाठेन तत्कृतनिर्णयेन न्यायसदाचारसंवादिना विरोधात्, किन्तु प्रवृत्ते मधुमासे तु प्रतिपत्सु विभूतये इत्येव पाठः इति ग्रन्थेन समर्थितं स्मृतिकौस्तुभकृता अनुमोदितं च दिवाकरभट्टेन चैत्रकृष्णप्रतिपदि श्वपचस्पर्शो होलिकाभूतिवन्दनं चूतकुसुमप्राशनम् च प्रवृत्ते मधुमासे तु प्रतिपत्सु विभूतये इति वचनात् । इदं च पूर्वविद्धायामेव कार्यम् वत्सरादौ वसन्तादाविति वृद्धवसिष्ठवाक्यात्' इति वाक्यसंदर्भेण तिथ्यर्के ।

एवं च द्विविधनिबन्धदर्शनेन संशयः समुन्मिषति यत् वसन्तोत्सवः पूर्वविद्धायां प्रतिपदि कार्य उत औदयिक्यामिति, तत्र पूर्वविद्धायां प्रतिपदि वसन्तोत्सवः कार्य इत्येवास्मभ्यं रोचते वत्सरादाविति वचनात्।

पञ्चमी सप्तमी चैव दशमो च त्रयोदशी।
प्रतिपन्नवमी चैव कर्तव्या संमुखी तिथिः॥
सम्मुखा नाम सायाह्नव्यापिनी दृश्यते यदा।
शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः॥

The UNIVERSITY OF CHICAGO LIBRARY

इत्यादिवचनैः कृष्णप्रतिपदः सायाह्नव्यापिन्या एव ग्राह्यत्वबोधनात्—

चैत्रे मासि महाबाहो पुण्ये तु प्रतिपद्दिने।
यस्तत्र श्वपचं स्पृष्ट्वा स्नानं कुर्यान्नरोत्तमः॥

इत्यनेन 'संतर्प्य पितृदेवताः' इत्यनेन च वचनेन अस्यां स्नानस्य पितृतर्पणस्य च विधानात्।

व्रते स्नाने तथा नक्ते पितृकार्ये विशेषतः।
यस्यामस्तगतो भानुः सा तिथिः पुण्यभाग्भवेत्॥

इति वचनेन सूर्यास्तसंगतायाः प्राशस्त्यावगमाच्च।

नच प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवाविति वचनादौदयिक्याः प्रतिपद एव ग्राह्यत्वमुचितमिति वाच्यम् तिथ्यर्के प्राचीननिबन्धे हस्तलिखिते निर्णयामृते च प्रतिपत्सु विभूतये इति पाठस्यैव दर्शनात् स्मृतिकौस्तुभकृता समर्थनाच्च निर्णयसिन्ध्वादावुपलभ्यमानस्य प्रतिपद्युदिते रवाविति पाठस्य अप्रामाणिकत्वात् यद्यपि मुद्रितनिर्णयामृतपुस्तकेऽयमेव पाठ उपलभ्यते तथापि पूर्वापरसंदर्भेण स्मृतिकौस्तुभानुरोधेन च लेखकप्रमादजोऽयं पाठ इत्यवधेयम्।

प्रतिपद्युदिते रवाविति पाठस्य प्रामाणिकत्वेऽपि प्रतिपदीत्यस्य नहि भिक्षुकन्यायेन वत्सरादाविति वचनैकवाक्यतानुरोधेन च प्रधानीभूतवन्दनक्रियायामेवान्वयस्यौचित्यम् नतु क्त्वप्रत्ययार्थकर्तृविशेषणीभूतोद-

यनक्रियायाम् तत्रैवान्वयस्याभिमतत्वे प्रतिपद्युदये रवेरिति प्रयोगस्यैव स्मृतिकर्तुः करणीयत्वौचित्यात्। एवं सति रवौ उदिते सति प्रतिपदि धूलिवन्दनं कुर्यादित्यर्थलाभेन यत्र रात्रौ प्रतिपत्प्रवेशः तदानीं धूलिवन्दनं न कार्यं किन्तु सूर्ये उदिते एवेति फलति।

न च—वृत्ते तुषारसमये सितपञ्चदश्यां
प्रातर्वसन्तसमये समुपस्थिते च।
संप्राश्य चूतकुसुमं सह चन्दनेन
सत्यं हि पार्थपुरुषोऽथ समां सुखी स्यात्॥

इत्यादिवचनैः प्रातःकालस्यैव कर्मकालत्वावगमेन कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः इति वचनादौदयिकी प्रतिपदेव ग्राह्या इति पुरुषार्थचिन्तामणिकृदुक्तं युक्तमिति वाच्यम्, तस्माद्द्यूतं प्रकर्तव्यं प्रभाते सर्वदा बुधैः। इति ब्रह्मपुराणवचनेन बलिप्रतिपदुत्सवस्य प्रातःकालिकत्वावगमेन पूर्वविद्ध प्रकर्तव्या शिवरात्रिर्बलेर्दिनम्, इति वचनेन पूर्वविद्धायाः बलिप्रतिपदः सिद्धान्ततत्वेन च यदा प्रातरमा वर्तते न प्रतिपत् किं द्यूतं कर्तव्य उत कर्मणो यस्य यः काल इति वचनेन उत्कर्षकम् इति संदिह्य तदानीं ज्योतिःशास्त्रप्रसिद्धप्रतिपदोऽभावेऽपि—

यां तिथिं समनुप्राप्य उदयं याति भास्करः।
सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु॥ इति
यां प्राप्यास्तमुपैत्यर्कः सा चेत्स्यात्त्रिमुहूर्तिका।
धर्मकृत्येषु सर्वेषु सम्पूर्णा तां विदुर्बुधाः॥ इति
यां तिथिं समनुप्राप्य यात्यस्तं पद्मिनीपतिः।
सा तिथिस्तद्दिने प्रोक्ता त्रिमुहूर्ता यदा भवेत्॥

इत्यादिस्मृतिवचनैरापादितायाः प्रतिपदः सत्वेन प्रातः संकल्पयेद्विद्धानुपवासव्रतादिकम् इति वचनेन अमादिवेलायां प्रतिपदुपवासादिसंकल्पस्येव प्रातरमायामपि द्यूतानुष्ठानस्य कालमाधवे सिद्धान्ततत्वे तन्नयेन प्रकृते सायाह्नव्याप्तप्रतिपदः सत्वेन पूर्णिमायां धूलिवन्दनानुष्ठानेऽपि कर्मणो यस्येति वचनस्यानुपरोधात्।

Cont-Long

एतेन निर्णयामृतमते कर्मणो यस्येत्यनुरोधेन धूलिवन्दनोक्तष संभाव्य प्रातर्वसन्तसमय इत्यादिवाक्यस्थस्य प्रातर्ग्रहणस्योपरोधः स्यादिति पुरुषार्थचिन्तामणिकृदुक्तं दूषणमपास्तम् ।

न च प्रतिपत्सद्वितीया स्यादिति वचनस्य प्रतिपद्यष्यामावास्या इति वचनानुरोधेन कृष्णप्रतिपद्विषयकत्वात् द्वितीयाविद्धायाः प्रतिपद एवेह ग्रहणमुचितमिति वाच्यम् ; वत्सराजीयेन—

शुक्लादिप्रतिपत्सर्वा पूर्वविद्धा प्रशस्यते ।
कृष्णात्तूत्तरविद्धैव चैत्रकृष्णां विहाय तु ॥
चैत्रशुक्ला च प्रतिपदुदयव्यापिनी मता ।

इति स्मृतिदीपिकोद्धृतेन विशेषवचनेन प्रतिपत्पञ्चमी चैव उपोष्या पूर्वसंयुता । इति वचनेन उपवासातिरिक्तविषयकत्वस्येव चैत्रकृष्णप्रतिपदतिरिक्तविषयकत्वस्यैव प्रतिपत्सद्वितीयेति वचनस्य न्याय्यत्वेनेहाप्रवृत्तेः । निर्णयामृते प्रतिपत्सद्वितीयेति वचनस्य तिलकाशोककरवीरव्रतविषयकत्वस्य व्यवस्थापनाच्च ।

अत एवामुमेव पक्षं चोदक्षमं मत्वा समयमयूख, स्मृतिचन्द्रिका, स्मृतिसिद्धान्तसंग्रह, व्रतराज, कृत्यामृत, स्मृतिदीपिका, तत्वमुक्तावली, प्रभृतयो निबन्धाः समर्थयन्ते काश्यां शिष्टाचारोऽप्येवमेव ।

तस्मान्निर्णयामृतसंमता पूर्वविद्धा प्रतिपदेव धूलिवन्दने ग्राह्या नतु निर्णयसिन्धूक्ता औदयिकीति मतम् ।

इति न्यायव्याकरणाचार्येण पण्डितश्रीसूर्यनारायणशुक्लेन
विरचितो वसन्तोत्सवनिर्णयः समाप्तः ।

मुद्रकः—विद्याविलास प्रेस, बनारस सिटी । सन् १९४९

राष्ट्रभाषा का प्रथम पुष्प !! प्रकाशित हो गया !!!

काशी-बिहार-पंजाब-मध्यप्रान्त-बृहत राजस्थानसंघ-विंध्यप्रदेश आदि
संस्कृत की परीक्षा एवं जूनियर हाई स्कूल के लिए उपयुक्त-

राष्ट्रभाषा सरल हिन्दी व्याकरण

यों तो हिन्दीमें अनेकों व्याकरण प्रकाशित हो चुके हैं किन्तु, स्वतंत्र भारतमें संस्कृतग्रन्थागार—'चौखम्बा संस्कृत पुस्तकालय' से प्रकाशित, इस राष्ट्रभाषा सरल हिन्दी व्याकरण को कोई भी नहीं पाता। इसमें सूक्ष्मसे सूक्ष्म बातोंका तथा स्थूलसे स्थूल बातोंका विचार किया गया है जैसे-'जो कि' लिखना गलत है 'जो' लिखना शुद्ध है। किमधिकम्, हिन्दीके पत्रों—'भारत' 'संसार' 'आज' तथा श्रीयुक्त सम्पूर्णानन्दजी (शिक्षा-सचिव) बाबूराव विष्णुपराड़कर, आदि धुरन्धर हिन्दी वेत्ताओंके मतोंसे अलंकृत एवं नागरी प्रचारिणी सभा के सभापति श्रयुक्त पं० रामनारायण मिश्र एवं हिन्दू विश्वविद्यालयके प्रोफेसर पं० विश्वनाथप्रसाद मिश्र एम्० ए० की सम्मतियोंसे सुसज्जित यह व्याकरण "गागरमें सागर" भरते हुएके समान है। इसे पढ़कर हिन्दी व्याकरणके नियमों को भलीभांति ज्ञातकर संस्कृत व्याकरणका भी ज्ञान इसीसे अच्छी प्रकार प्राप्त कर सकते हैं। यह सुविधा किसी हिन्दी व्याकरणमें नहीं है। १।)

प्रबन्ध-पारिजात

लेखकः—पण्डित श्री रामचन्द्र मिश्र प्रोफेसर
धर्मसमाज सं० कालेज मुजफ्फरपुर।

इसमें परीक्षार्थी छात्रोंको संस्कृत प्रबन्ध रचना लिखने के नियम अत्यन्त सरल रूपमें समझाये गये हैं और तदनुसार परीक्षोपयोगी 'प्रबन्ध लेखनप्रकार' (परीक्षामें आने योग्य निबन्धों का उत्तर) इस तरह सरल और संक्षिप्त में लिखा गया है कि अभ्यास कर लेने पर भी विद्यार्थी परीक्षामें पूरी सफलता प्राप्त कर सकते हैं। इतना ही नहीं अन्तमें(१)'पत्र-लेखन प्रकार'(चिट्ठी-पत्री, आवेदन पत्र आदिका उल्लेख) तथा प्रसंगोपयुक्त (२) 'सुभाषितगद्यावली' (३) 'सुभाषित-पद्यांशावली' और (४) 'लौकिक न्यायमाला' आदि विषयोंका समावेश करके आधुनिक चतुरस्र विद्वान् बननेका सुगम रास्ता दिखाया गया है। विश्वास है कि आजतक के प्रकाशित प्रबन्धोपयोगी ग्रन्थों में इस 'प्रबन्धपारिजात' के समान दूसरी कोई भी पुस्तक नहीं है। १।)

प्राप्तिस्थानम्-चौखम्बा संस्कृत पुस्तकालय, बनारस सिटी।